# Shri Ganadhisha Stuti Suryakrita

# સૂર્યકૃતા શ્રીગણાધીશસ્તુતિઃ

## Document Information

Text title : Shri Ganadhisha Stuti Suryakrita

File name : gaNAdhIshastutiHsUryakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 44 | 6.44 10-21||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# સૂર્યકૃતા શ્રીગણાધીશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સૂર્ય ઉવાચ ।
નમસ્તે વિકટાયૈવ માયામાયિકરૂપિણે ।
વામાઙ્ગે સંજ્ઞયા યુક્ત દક્ષિણાઙ્ગે ચ ભાનવે ॥ ૧૦॥
તયોર્યોગે ગણાધીશ સિદ્ધિબુદ્ધિપતિર્મતઃ ।
ગજાનનાદિચિહ્નૈશ્ચ સંયુતસ્તે નમો નમઃ ॥ ૧૧॥
એકમેવાદ્વિતીયં યદ્બ્રહ્મ તદ્વર્ણયે કથમ્ ।
ધન્યોઽહં સર્વભાવેન દેવં દૃષ્ટ્વા ગજાનનમ્ ॥ ૧૨॥
ગજાનનાય સર્વાદિપૂજ્યાય પરમાત્મને ।
હેરમ્બાય સદા જ્યેષ્ઠરાજાય તે નમો નમઃ ॥ ૧૩॥
પરેશાય મહાવિઘ્નનાશનાય મહાત્મને ।
દુરાત્મભ્યો મહાવિઘ્નદાયકાય નમો નમઃ ॥ ૧૪॥
અનાથાય સનાથાનાં નાથાય સર્વદાયિને ।
અનાથાનાં પ્રણાથાય નાથનાથાય તે નમઃ ॥ ૧૫॥
અનન્તવિભવાયૈવાનન્તમાયાપ્રધારિણે ।
બ્રહ્મણસ્પતયે તુભ્યં કવયે તે નમો નમઃ ॥ ૧૬॥
મૂષકવાહનાયૈવ સર્વાન્તરપ્રચારિણે ।
મૂષકધ્વજિને તુભ્યં મયૂરેશ નમોસ્તુ તે ॥ ૧૭॥
કિં સ્તૌમિ ત્વાં ગણાધીશ પઞ્ચચિત્તપ્રચાલક ।
અતોઽહં પ્રણમામ્યેવ તેન તુષ્ટો ભવ પ્રભો ॥ ૧૮॥
એવં સંસ્તુવતસ્તસ્ય ભક્ત્યા રોમોદ્ગમોઽભવત્ ।
રુદ્ધકણ્ઠં પ્રનૃત્યન્તં ગણેશસ્તં જગાદ હ ॥ ૧૯॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
મદીયસ્તવનં ચેદં સર્વદં સમ્ભવિષ્યતિ ।

ત્વયા કૃતં પઠેદ્યશ્ચ શ્ృણુયાત્તસ્ય સર્વદા ॥ ૨૦॥
યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
સન્તુષ્ટોઽતે બ્રહ્મમયં કરિષ્યામિ મહામતે ॥ ૨૧॥

ઇતિ સૂર્યકૃતા શ્રીગણાધીશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૪૪ । ૬.૪૪ ૧૦-૨૧॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 44 . 6.44 10-21..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganadhisha Stuti Suryakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*